International Journal of Sanskrit Research 2018; 4(5): 111-112

International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2018; 4(5): 111-112
© 2018 IJSR
www.anantaajournal.com
Received: 14-07-2018
Accepted: 16-08-2018

**Sasmita Das**
Research Scholar,
P.G. Department of Sanskrit,
Utkal University, Vani Vihar,
Bhubaneswar, Odisha, India

**Correspondence**
**Sasmita Das**
Research Scholar,
P.G. Department of Sanskrit,
Utkal University, Vani Vihar,
Bhubaneswar, Odisha, India

# संस्कृतमातृकासम्भारे नामनिर्मलदर्पणस्य स्थानम्

**Sasmita Das**

### १. उपक्रम: (Introduction)

प्राचीनोत्कलस्य वैदुष्यपरंपरा महती आसीत्। नैके संस्कृतविद्वांस: कवय: धर्मशास्त्रकारा: ज्योतिश्शास्त्रप्रणेतार: वैयाकरणा: स्वपाण्डित्यप्रकर्षेण इमां भूमिम् अलंचक्रु:। 'प्रथमे वै विद्वांसो वैयाकरणा:' इति ध्वनिकारस्य आनन्दवर्द्धनस्य वचनप्रामाण्यात् उत्कल-प्रदेशे अनेके वैयाकरणा: पाणिनीय-कातन्त्र्य-जुमर-सारस्वत-हरिनामामृतादि-व्याकरण-परंपरासु न केवलं निष्णाता: आसन् अपि च मूलग्रन्थानामुपरि टीका-टिप्पण्यादीनि प्रणीतवन्त:। उत्कलराज्यसंग्रहालये तथा अन्यत्र उपलब्धा: व्याकरणविषयका: शतश: पाण्डुलिपय: उत्कलीयवैयाकरणानां व्याकरणशास्त्रं प्रति समधिकं योगदानं ख्यापयन्ति। तेषु वैयाकरण-रामचन्द्रस्य प्रसिद्ध-प्रक्रियाकौमुदीग्रन्थोपरि लिखितोऽयं टीकाग्रन्थ: नाम्ना नामनिर्मलदर्पण: एकमहार्घग्रन्थरत्नं विद्यते। ग्रन्थस्यास्य प्रणेता उत्कलीय: वैयाकरण: लक्ष्मीधरोद्गाता इति। परन्तु अद्यावधि ग्रन्थोऽयं लोकलोचनस्यान्तराले एव वर्तते यत्तु अस्य प्रकाशनं न विहितं केनचिदपि।

### २. ग्रन्थकर्त्तु: परिचय: (About the Author)

नामनिर्मलदर्पणग्रन्थस्यादौ सूचितोऽस्ति यत् ग्रन्थकर्त्ता जातुकर्णगोत्रीय: एवासीत्। नृसिंह: उद्गाता इति तस्य पितुर्नाम। तस्य जन्मस्थानं भवति पुरुषोत्तमक्षेत्रस्य गङ्गानारायणपुरमिति। स: जात्या ब्राह्मण: आसीत्। यथोक्तं ग्रन्थकारेण –

गङ्गानारायणे नाम्नि देशे श्रीपुरुषोत्तमे।
वेदाङ्गविद्भिर्विप्रैश्च निवासपूरिते पुरे॥ १॥
परंपराक्रमेणैव पितृभ्य: स्वकृतोद्भवै:।
कुर्वता जातुकर्णस्य गोत्रोत्पन्नेन धीमता॥ २॥
नृसिंहोद्गातु: पुत्रेण लक्ष्मीधर-द्विजन्मना।
क्रियते बालबोधाय नामनिर्मलदर्पण:॥ ३॥

- नामनिर्मलदर्पण:, OSM, Gr-17, Folio-1

अत: नामनिर्मलदर्पणाख्यस्य ग्रन्थस्य ग्रन्थकार: लक्ष्मीधरोद्गाता उत्कलीय: इति नास्त्यत्र सन्देह:।

### ३. नामनिर्मलदर्पणग्रन्थस्य परिचय: (About the text)

नामनिर्मलदर्पणस्य रचयिता उत्कलीय: वैयाकरण: लक्ष्मीधरोद्गाता। ग्रन्थोऽयं रामचन्द्रस्य प्रक्रियाकौमुद्या: व्याख्याग्रन्थ: एव। अयं तु सूचनायोग्य: यत् प्रक्रियाकौमुद्या: प्राय: सर्वे अध्याया: लक्ष्मीधरोद्गात्रा ग्रन्थेऽस्मिन् व्याख्याता: सन्ति। विठ्ठलस्य प्रसादटीकाग्रन्थ: प्रक्रियाकौमुद्या: प्रसिद्ध: टीकाग्रन्थ: इति। ग्रन्थस्यास्य प्रभाव: नामनिर्मलदर्पणग्रन्थे परिलक्ष्यते एव। माड्रासविश्वविद्यालय- पाण्डुलिपिसंग्रहालये अस्य ग्रन्थस्य तिस्र: कर्गजमातृका: प्राप्यन्ते। प्रथममातृकायां संज्ञात: समासाश्रयविधिप्रकरणान्तं यावत् वर्त्तते। द्वितीयमातृकायां तिङन्तप्रकरणं विद्यते। तृतीयमातृकायां कृदन्तप्रकरणं राजते। संज्ञात: समासाश्रयविधिप्रकरणान्तं पूर्वार्द्धम्। तिङन्तकृदन्तप्रकरणम् उत्तरार्द्धम् इति ज्ञायते। एता: पाण्डुलिपय: स्पष्टाक्षरै:

देवनागरीलिप्या लिखिता: । ओडिशा - राज्यसंग्रहालये ग्रन्थस्यास्य ताडपत्रपाण्डुलिपय: लभ्यन्ते ता: ओडिआलिप्या संस्कृतभाषया लिखिता: वर्तन्ते ।

**४. नामनिर्मलदर्पणस्य उत्तरार्द्धे आलोचिता: विषया: (Described Contents)**
अत्र सूचयामि यत् उत्कलविश्वविद्यालयस्य अन्य एक: शोधकर्त्ता अस्य ग्रन्थस्य पूर्वार्द्धस्य पाण्डुलिपीनामुपरि शोधकार्य्यं कृतं वर्त्तते । अत: मया महता प्रयत्नेन ग्रन्थस्यास्य उत्तरार्द्धस्य पाण्डुलिपीनां संग्रहं कृत्वा तदुपरि अनुशीलनं कृतं वर्त्तते । प्रारम्भिकानुशीलनात् एतद् ज्ञायते यत् नामनिर्मलदर्पणस्य उत्तरार्द्धे परस्मैपदिव्याख्या; आत्मनेपदिव्याख्या, भ्वादि-अदादि-जुहोत्यादि-दिवादि-स्वादि-तुदादि-रुधादि – तनादि - क्र्यादि - चुरादि – प्रकरणानि, पूर्वकृदन्ते कृत्यप्रत्यया: कृत्येतरप्रत्यया:, उत्तरकृदन्त: इत्यादय: विषया: सम्यक् व्याख्याता: सन्ति ।

**५. नामनिर्मलदर्पणस्य उत्तरार्द्धस्य शैली (Style)**

सूचनारूपेण पाण्डुलिप्या: प्रारम्भिकशैली अध: उपस्थाप्यते ।
3448 / NCC SR 1949, Folio -1
श्रीगौरीशङ्कराभ्यां नम:
तव तत्त्वं न जानामि कीदृशोऽसि महेश्वर ।
यादृशोऽसि महादेव तादृशाय नमो नम: ॥
नमो गणेशविघ्नेश गिरिजानन्दनप्रभो ।
मम विघ्नं निहत्यासु सर्वसिद्धिप्रदो भव ॥
ओं नमो विघ्नवल्लीविघ्नंसनकुठाराय ॥
श्री गणेशाय नम: अविघ्नमस्तु ॥

**नामनिर्मलदर्पणे उत्तरार्द्धम्**

गङ्गानारायणे नाम्नि देशे श्रीपुरुषोत्तमे ।
- - - - - - - - - - - - - - - -
- - - - - - - - - - - - - - - -
क्रियते बालबोधाय नामनिर्मलदर्पणम् ॥
त्रिभि: कुलकम् ॥

प्रकृतिरित्यादि सा वैयाकरणाभिमता आद्या प्रकृति: प्रत्ययमवधीकृत्य कृत्वा वा य: पूर्वमुपादीयते शब्द: सा प्रकृतिरिति वा ।

**६. उपसंहृति: (Conclusion)**
संस्कृतस्य भूयांस: अमूल्यग्रन्था: आत्मप्रकाशाय प्रतीक्षारता:। यतो हि ते अद्यावधि ताड़पत्रादिमातृकासु कुत्रचित् संग्रहालये ग्रन्थालये अभिलेखागारे वा पतिता: सन्ति। उत्कलीय-यशस्विवैयाकरण-लक्ष्मीधरस्य नामनिर्मलदर्पणाख्यो ग्रन्थोऽपि तामवस्थां प्रतिपन्न: सन् ओड़िशा-राज्यसंग्रहालये, माड्रासविश्वविद्यालयस्य पाण्डुलिपिसंग्रहालये अन्यत्रापि अप्रकाशित: विद्वद्भि: अपरिशीलित: च वर्त्तते अद्यावधि। वैयाकरणानां दृष्टिपथं समागतेन न केवलम् अस्य महत्त्वं समेषां विदुषां पुरत: आगमिष्यति अपि च भारतीय-बौद्धिक-ऐतिह्यकोशेऽपि सुमहत् स्थानं लप्स्यते इति दृढविश्वास:।

**७. आधारग्रन्थानां सूची (References)**

1. OSM. नामनिर्मलदर्पण: (ताड़पत्रमातृका), क्र्यादिप्रक्रिया, 3412/Gr./6.
2. OSM. नामनिर्मलदर्पण: (ताड़पत्रमातृका), दशगणव्याख्या, 3413/Gr./7.
3. OSM. नामनिर्मलदर्पण: (ताड़पत्रमातृका), कृदन्तप्रक्रियाव्याख्या, 3415/Gr./9.
4. OSM. नामनिर्मलदर्पण: (ताड़पत्रमातृका), लकारार्थप्रक्रिया-प्रत्ययान्तव्याख्या, तिङन्तव्याख्या, 3416/ Gr. / 10.
5. OSM. नामनिर्मलदर्पण: (ताड़पत्रमातृका), कृदन्तव्याख्या, 3418/ Gr./12.
6. OSM. नामनिर्मलदर्पण: (ताड़पत्रमातृका), दशगणव्याख्या, 3420/ Gr./14.
7. OSM. नामनिर्मलदर्पण: (ताड़पत्रमातृका), कृदन्तप्रकरणम्, 3426/ Gr./108.
8. GOML/MUL. नामनिर्मलदर्पण: (कर्गजमातृका), कृतन्दप्रक्रिया, 3775/ NCC SR 2123.
9. GOML/MUL. नामनिर्मलदर्पण: (कर्गजमातृका),दशगण:, 3448/ NCC SR 1942.
10. मिश्र: मुरलीधर: (संपादक:), प्रक्रियाकौमुदी (तृतीयो भाग:), प्रकाशक: – सम्पूर्णानन्दसंस्कृतविश्वविद्यालय:, वाराणासी, द्वितीयसंस्करणम्, प्रकाशनवर्षम् – 2000.
11. Mishra Nilamani. (Ed.) An Alphabetical Catalogue of Sanskrit Manuscripts, Part-II, In the collection of Orissa State Museum, Bhubaneswar, 1st Edition, 1974.
12. Raja Kunjunni K. New Catalogus Catagorum, (Nā-Nvā), Madras University Sanskrit Series-35, Published by University of Madras, 1978, X.
13. Veezhinathan N. New Catalogus Catagorum, (Pāiyalacc hināmamālā-Pradyāna), Madras University Sanskrit Series-38, Published by University of Madras, 1988, XII.
14. Tripathy Dinabandhu. Contribution of Orissa to Sanskrit Grammar, Subhadra Publications, 1st edition, 2008.
15. Trivedi Pranashankar, Kamalashankar. (Crit. Ed.) The Prakriyākaumudī of Rāmachandra, Published by Paranjpe, V.J., Secretary, BORI, Poona, First edition, 1925, I.